# Shri Hari Dhyanashtakam

# શ્રીહરિધ્યાનાષ્ટકમ્

## Document Information

Text title : haridhyAnAShTakam

File name : haridhyAnAShTakam.itx

Category : vishhnu, aShTaka, dhyAnam, vrajakishora

Location : doc_vishhnu

Author : Vrajakishora Tripathi

Transliterated by : Vrajakishora Tripathi

Proofread by : Vrajakishora Tripathi

Latest update : December 8, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીહરિધ્યાનાષ્ટકમ્

વન્દે કાન્તતનું પ્રશાન્તવદનં વન્દે સુચક્રેક્ષણં
    વન્દે મેઘનિભં મહામ્બુજકરં વન્દે પદાલક્તકમ્ ।
વન્દે કોટિરવિદ્યુતિધૃતિહરં વન્દે સુવર્ણાન્વિતં
    વન્દે નીલકલેવરં સ્મિતહસં વન્દે સદા શ્રીહરિમ્ ॥ ૧॥

વન્દે શ્રોણિતટે સુપીતવસનં વન્દે મહાકૌસ્તુભં
    વન્દે શીર્ષપટે સુરમ્યમુકુટં વન્દે લસન્મૌક્તિકમ્ ।
વન્દે કઙ્કણરાજિતં કરયુગે વન્દેતિભૂષોજ્જ્વલં
    વન્દે સુન્દરભાલભાગતિલકં વન્દે સદા શ્રીહરિમ્ ॥ ૨॥

વન્દે ચક્રકરં કરે કમલિનં વન્દે ગદાધારિણં
    વન્દે શઙ્ખધરં સ્યમન્તકકરં વન્દે વિલાસાલયમ્ ।
વન્દે સાગરકન્યકાપતિમણિં વન્દે જગત્સ્વામિનં
    વન્દે સત્ત્વમયં વિહઙ્ગગમનં વન્દે સદા શ્રીહરિમ્ ॥ ૩॥

વન્દે વિશ્વપતિં સુરેશ્વરપતિં વન્દે ધરિત્રીપતિં
    વન્દે લોકપતિં સુદર્શનપતિં વન્દેમરાણાં પતિમ્ ।
વન્દે શઙ્ખપતિં ગદાવરપતિં વન્દે ગ્રહાણાં પતિં
    વન્દે તાર્ક્ષપતિં ચતુર્યુગપતિં વન્દે સદા શ્રીહરિમ્ ॥ ૪॥

વન્દે બ્રહ્મપતિં મહેશ્વરપતિં વન્દેખિલાનાં પતિં
    વન્દે શાર્ઙ્ગપતિં વિકર્ત્તનપતિં વન્દે પ્રજાનાં પતિમ્ ।
વન્દે યજ્ઞપતિં ચ કૌસ્તુભપતિં વન્દે મુનીનાં પતિં
    વન્દે ભક્તપતિં ભવાર્ણવપતિં વન્દે સદા શ્રીહરિમ્ ॥ ૫॥

વન્દે સર્વગુણેશ્વરં સુરવરં વન્દે ત્રિલોકીશ્વરં
    વન્દે પાપવિઘાતકં રિપુહરં વન્દે શુભાયત્તનમ્ ।
વન્દે સાધુપતિં ચરાચરપતિં વન્દે જનાનાં પતિં
    વન્દે ગોલકધામનાથમનિશં વન્દે સદા શ્રીહરિમ્ ॥ ૬॥

વન્દે શ્રીજગદીશ્વરં ક્ષિતિધરં વન્દે ચ ધર્મદ્રુમં
    વન્દે દૈત્યનિસૂદનં કલિહરં વન્દે કૃપાકારકમ્ ।
વન્દે કાલકરાલદણ્ડદહકં વન્દે સુમુક્તિપ્રદં
    વન્દે સર્વસુખાસ્પદં સુરગુરું વન્દે સદા શ્રીહરિમ્ ॥ ૭॥

વન્દે ન્યાયયશોધિપં દુરિતહં વન્દે દયાદાયકં
    વન્દે જન્મહરં કુનીતિદમનં વન્દે સુકામપ્રદમ્ ।
વન્દે ભક્તવિનોદનં મુનિનુતં વન્દે પ્રજારઞ્જકં
    વન્દેઽનાથપતિં દરિદ્રનૃપતિં વન્દે સદા શ્રીહરિમ્ ॥ ૮॥

ઇતિ શ્રીવ્રજકિશોરવિરચિતં શ્રીહરિધ્યાનાષ્ટકં સમ્પૂર્ણમ્ ।

(નિદ્રાભઙ્ગસમયે લિખિતમ્)

Composed, encoded and proofread by Vrajakishora.

---

*Shri Hari Dhyanashtakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*